ISSN : 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४६/१-२, वि.सं. २०७२(संयुक्ताङ्कः)



नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः॥

शिशुपालवधमहाकाव्यम्-६.२

Scanned by CamScanner

# संस्कृतसाहित्ये राष्ट्रिय-भावना

रामहेतः गौतमः

'राष्ट्र' शब्दः भ्वादिगणीय दीप्त्यर्थे 'राज्'(राजति, राजते, राजित) धातुना 'ष्ट्रन्' प्रत्यययोगेन निष्पन्नः भवतिः। अस्य 'राष्ट्र' पदस्य अर्थोऽस्ति-'राज्यं, देश, अधिवासी, जनता, प्रजा'।'राष्ट्रं मे देहि'[१], 'त्वा राष्ट्रभृत्याय'[२], अभिराष्ट्राय वर्धय'[३] इत्यादिषु वैदिकेषु वाक्येष्वपि राष्ट्रपदस्यार्थः जनता/मानवसमाजो एव विद्यते। एषः समाजः देश-काल-परिस्थित्यनुसारेण मानवानां सांस्कृतिकसमन्वयेन, धार्मिकसमरसतया, सहनशीलतया, सौहार्द्रेण, सहयोगेन समर्पणेन च एकस्मिन्नेव संगठितभू-भागे, एकस्मिन्नेव केन्द्रीय-नेतृत्वे संपोषितः भवति। अतएव स्पष्टं यत् राष्ट्रमेव जनता जनतैव राष्ट्रम्। राष्ट्रिय-राष्ट्रे भवः, अर्थात् राष्ट्रेन सम्बद्धः। एवमेव राष्ट्रसम्बन्धिनी भावनैव राष्ट्रिया भावना। सम्पूर्णसंस्कृतवाङ्मयं राष्ट्रिय-भावनया परिपूर्णं वर्तते। सम्प्रति समाजे राष्ट्रिय-भावना-सन्दर्भिणं वैचारिक-वातावरणं बहु उष्णं दरीदृश्यते। अधुना यः कोऽपि जनः स्व-स्वमतानुसारेण स्वदेशभक्तेः परिभाषां निर्धारयति निरंकुशव्यवहारं च करोति। अतः अद्य जनेभ्यः राष्ट्रिय-भावनायाः सम्यक् ज्ञानमत्यावश्यकमस्ति। विद्वद्वर्गः विषयेऽस्मिन् विचारशीलः अपि अस्ति। संस्कृतवाङ्मयस्य मनीषीनां सुचिन्तितां राष्ट्रिय-भावनां जनसामान्यस्य सम्मुखे उपस्थापनाय एव एषः प्रयासः। वैदिकवाङ्मये राष्ट्रिय-भावनया ओतप्रोतेन



Scanned by CamScanner

वैदिकर्षिणा निवेद्यते-

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतयेऽभिराष्ट्राय वर्धय।।[४]

हे ब्रह्मणस्पति! समृद्धिं शक्तिं प्रदायिनीं तां मणिं मह्यं ददातु यां प्राप्य इन्द्रः समृद्धिं उन्नतिं च प्राप्तवान्। शत्रुना पीडितमस्माकं राष्ट्रस्य समृद्धिं वर्धय। त्वदीयकृपया वयं कुशलशासकैः शासिते राष्ट्रे शत्रुभयरहिताः भवामः।

भारतदेशस्य जनतायाः भावनाः मूलरूपेण भारतदेशस्य भौगोलिकी-सीमाभिः तथा च प्राकृतिक-सम्पदाभि सह संयोजिताः भवन्ति। 'स्वप्नवासवदत्तम्' नाटके महाकविभासेन उल्लिखितमस्ति यत्-

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः।।[५]

अस्माकं इयं राष्ट्रभूमिः तिसृषु दिक्षु सागरेणावृता अस्ति। हिमालयविन्ध्याचलौ धारयन्ती एकसाम्राज्यध्वजेनरक्षिता अस्ति भारतभूमि। इमां भूमिं राजसिंहः अर्थात् शक्तिसम्पन्नः राजा एव शासयेत। अस्माकं राष्ट्रस्य 'भारत' इति संज्ञायाः सार्थकतां प्रतिपादयन् विष्णुपुराणकारेणोक्तं यत्-

उत्तरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणे।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।[६]

अथर्ववेदे पृथ्वीसूक्तस्य मन्त्रोऽयं -"माता भूमिः पुत्रोऽहं पृथिव्याः" भारत-भूमिं प्रति पुत्रवदात्मीयतायाः भावं सदा स्फारयति। भारत-भूमेः प्राकृतिकां वन-सम्पदां, जलस्रोतान् पर्वतान् पशूञ्च प्रत्यपि दैवीय-भावः मन्यते एषा अपि राष्ट्रिय-भावना एव। प्राकृतिकानां तत्त्वानां शान्ति-समृद्ध्यर्थाय शुक्लयजुर्वेदे वैदिकर्षिः स्तवनं करोति यत्-

द्यौः शान्तिरन्तरिक्ष शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिः विश्वेदेवाः शान्तिः ब्रह्मः शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि। शान्तिः शान्तिः शान्तिः।।[७]

राष्ट्रस्य समृद्धिः तदैव स्थिरवती भविष्यति यदा राष्ट्रस्य सुरक्षा समीचीना भविष्यति। अतः राष्ट्रस्य भक्ताः जनाः सदा सचेतनाः सतर्काश्च भवेयुः। अभिज्ञानशाकुन्तले महाकविकालिदासेन कामयते यत्-'प्रवर्ततां प्रकृतिहिताय पार्थिवः'[८] राजानः सदा जगद्धिताय प्रवृत्ताः भवन्तु। ते स्मयदूषिताः न भवन्तु। तेषां कर्त्तव्यमस्ति यत् तेन विद्यानां, विदुषः विद्यार्थिनः च सदा रक्ष्यन्ताम्। कविना भतृहरिणा कथ्यते यत्-


अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577

Scanned by CamScanner

राजन्दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकमिमं पुषाण।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलं फलति कल्पलतेव भूमिः।।[९]

भो राजन् सम्प्रत्येनां गन्धवतीरूपां नवप्रसूतिकां गां पालय यद्यस्त्यिच्छा ते समृद्धेर्हेतवे तां दोग्धुं, शिवान् संकल्पान् धारय तस्य हेतून्। शिवानि व्यवहारानि एव राष्ट्रकल्याणकानि भवन्ति। प्रशासकस्य राष्ट्रियां भावनां उपस्थापयन् महाकविः अश्वघोषो अवदत्–

इष्टेष्वनिष्टेषु च कार्यवत्सु न रागदोषाश्रयतां प्रपेदे।
शिवं सिषेवे व्यवहारशुद्धं यज्ञं हि मेने न तथा यथा तत्।।[१०]

भावोऽस्त्यस्य श्लोकस्य सम्राट् राज्यशासनव्यवहारे राग–द्वेषरहितान् निर्णयान् धारयन्ति स्म। राष्ट्रस्य कृते यज्ञानां अपेक्षया शिवं व्यवहारं अधिकमावश्यकंमन्यते। अनया न्यायप्रक्रियया एव राष्ट्रनिर्माणं भवति भविष्यति च। प्रजासुखमेव राज्ञः सद्राष्ट्रभक्तिः भवति।

प्रजासुखे सुखं राज्ञः प्रजानां तु हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।[११]

इत्थं वयं पश्यामः राज्ञा विश्वप्रजायाः सम्यग्संरक्षणार्थं तस्याः सुखदुःखान्विताः भावनाः समभावेनश्रताः। प्रजासंघेन प्रजावृद्धिः ततः राष्ट्रसमृद्धिः, प्रजायाः अस्तित्वे एव राष्ट्रसत्ता, अतः प्रजाहितमेव सर्वेषां हितं अस्ति। यस्य कृते शिक्षा–स्वास्थ्य–सुरक्षाणां समुचिता व्यवस्थानिवार्यास्ति। एतेषु कार्येषु शैथिल्यमेव राष्ट्रोन्नतौ बाधा। 'आचारः कुलमाख्याति' इति सुभाषितेन स्पष्टं भवति यत् जनस्याचारः एव तस्य कुलस्य परिचायकः अस्ति। एवमेव भारतराष्ट्रस्य जनानां आचारव्यवहारः एव विश्वपटले भारतस्य छविं निर्धारयति। प्रजानां व्यवहारं तेषां मानवतां च विद्यैव निर्धारयति। अतः कथ्यते इति–

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्याभोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्याबन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूज्यते, नहि धनं विद्याविहीनः पशुः।।[१२]

शिक्षया नागरिकाः गुणज्ञाः भवन्ति। गुणज्ञाः कौशलस्योपयोगिताः जानन्ति, ते तं ज्ञानकौशलं सम्यक्कार्ये एव प्रयुज्यन्ति असम्यक्कार्ये न। अतः हितोपदेशे उच्यते 'गुणाः गुणज्ञेषु गुणाः भवन्ति। ते निर्गुणं प्राप्य भवन्ति दोषाः।' एतमनुभूय अस्माकं माननीयः प्रधानमंत्री श्री नरेन्द्रमोदी कौशलविकासस्योपरि बलं ददाति।



Scanned by CamScanner

शिक्षायाः प्रसारेणैव नागरिकेषु सदसद्विवेकः आगच्छति। जाग्रतजनता राष्ट्रविरोधीतत्त्वानां सहायका न भूत्वा तेषां शमने सहायिका एव भवति भविष्यति चापि। सद्शिक्षायाः सम्यक्प्रसारेण जनाः वृत्तिरहिताः न भवन्ति। विद्या सुमतिं सम्पत्तिं समृद्धिं च ददाति। शिक्षया जनेषु जागृति आयाति वैचारिकभेदाः समन्ति। सद्शिक्षायाः अभावे जनेषु मतभेदाः जाग्रन्ति तेन कारणेन क्षेत्रवादः, जातिवादः भाषावादः साम्प्रदायिकता च उद्भवति यस्य दुष्फलं भारतेन निकटभूतकाले एव भुक्तम्। अतः राष्ट्रभेदकानां तत्त्वानां शमनाय कवि जनानाह्वयति–

अलं भारतीया मतानां विभेदैः, अलं देशभेदेन वैरेण चालम्।
अयं शाश्वतो धर्म एको धरायां, न संभाव्यते धर्मतत्त्वेषु भेदः।।[१३]

संस्कृतस्य मूर्धन्याः विद्वांसः एकमतेन स्वीकुर्वन्ति यत् अस्पृश्यता भारतीयायै राष्ट्रियतायै विघटनकारी विनाशकारी च आस्ति। या शीघ्रनाशनीया एवं तस्याः समूलं नाशनं शासकानां राष्ट्रभक्तानां जनानां च सर्वेषामपि नैतिकं कर्त्तव्यमेव अस्ति।[१४] भेदः राष्ट्रस्य कृते घातकः एव अस्ति राष्ट्रियजनानां मध्ये व्याप्यभेदोपरि कविः व्यञ्जयते यत्–

ब्राह्मणे स्नानसंलग्ने क्षत्रिये मत्सरप्रिये।
शूद्रे गृहाद् द्रुते भीते म्लेच्छः सर्वमपाहरत्।।[१५]

ब्राह्मणाः पूजामेव सर्वस्वम् अनुमन्य राष्ट्रं विस्मृतवन्तः। क्षत्रियाः स्वराष्ट्रियेषु जनेष्वेव स्वशक्तेरवसानमकुर्वन्। एकः विशालः जनवृन्दः पददलितकृत्वा अपमानार्थाय अक्षिपत्। अस्य भेदस्य परिणामः अवत् राष्ट्रस्य सर्वस्वं विदेशिभिः आक्रान्तैः ग्रस्तं जातम्। अद्यापि भारते विभेदकारी दुष्टावृत्तिः पुनर्पुनः मन्दं-मन्दं बलवती भवन्ती अस्ति। तस्याः प्रतिरोधनं अत्यावश्यकमस्ति। अतः वैदिकर्षेः कामनेयमतिप्रासंगिका अस्ति।

संगच्छध्वं संवदध्वं, सं वो मनांसि जानताम्।
देवाभागं यथा पूर्वे, संजानाना उपासते।।
समानो मन्त्रः समितिः समानी, समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये व, समानेन वो हविषा जुहोमि।।
समानी व आकूतिः, समाना हृदयानि वः।
समानमस्तु वो मनो, यथा वः सुसहासति।।[१६]

भवन्तः सर्वे एकीभूताः सन्तु। एकीभूत्वा वदन्तु। मिलित्वा एव ज्ञानलाभं कुर्वन्तु। सर्वे सहसंपर्किणः भवन्तु, सौमनस्यं निर्मान्तु, यथायोग्यंयथावसरे स्वदायित्वं पूर्णं कुर्वन्तु। मिलित्वैव मंत्रणां कुर्वन्तु। सर्वासु समितिषु



अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577

Scanned by CamScanner

समानमधिकारं स्वीकुर्वन्तु, राष्ट्रलक्ष्ये समहृदया: भवन्तु। सर्वे मिलित्वैव राष्ट्रकार्यं कुर्वन्तु। संघस्य शक्ते: महत्त्वं प्रतिपादयता आचार्येण कौटिल्येन निगदितं यत्-कुलस्य वा भवेद्राज्यं कुलसंघो हि दुर्जय:।[१७] संघीयां पद्धतौ राष्ट्रं दुर्जयं भवति।

भ्रष्टाचार: राष्ट्रघातको एव तस्मात् भ्रष्टाचारात् मुक्ते: स्वार्थत्याग: एव राष्ट्रं प्रति समर्पणभावं महतावश्यकं वर्तते। शासका: प्रशासकाश्च राग-द्वेषरहिता: भूत्वा शासयन्तु। न्यायप्रक्रियायां न्यायधीशा: विधिवेत्तारश्च, शिक्षणे शिक्षका:, चिकित्सायां चिकित्सका: पत्रकारितायां पत्रकारा:, रक्षणे सैनिका: एकं भावं केवलमेव धारयन्तु यत् मम कार्यं राष्ट्रहेतोरेव न मम च न मम परिजनानां कृते केवलम्। अस्माकं शिथिलिभवने भ्रष्ट: भवने वा राष्ट्रस्य ह्रासोएव भविष्यति। यस्य दुष्प्रभावात् अहं च मम परिजनाश्चापि विमुक्ता: न भविष्यन्ति। अत: आधुनिक: कवि: कथयति-

अन्यत्सर्वं प्रकृति-कुटिला: हन्त कुर्वन्तु कामं,
देशद्रोह-द्रुम-फल-विशन्न द्विशोऽपि स्वदन्तु।
त्वेकीभूय स्व-विशयतयाराष्ट्र-रागेणरक्ता:
भक्ता: भूमि-प्रभव विभव-प्राप्तये प्रोद्यतेरन्।।[१८]

राष्ट्रस्य सन्दर्भे श्रीमद्भगवद्गीताया: श्लोकोऽयं अति प्रासंगिकोऽस्ति।

विहाय कामान्य: सर्वान्पुमांश्चरति नि:स्पृह:।
निर्ममो निरहंकार: स शान्तिमधिगच्छति।।[१९]

राष्ट्रस्य स्वास्थ्य-समृद्धि: प्रजाया: स्वास्थ्य-समृद्धे: उपरि आश्रिता भवति। प्रजाया: व्यसनेभ्य: रक्षां प्रति तथा स्वास्थ्यसमृद्धिं प्रति प्राचीनकालादेव ध्यानं दीयते। प्रजानां मध्ये एव कुशला: शासका: शिक्षका: चिकित्सिका: आरक्षका: न्यायविदा: च प्राप्यन्ते। अत: सर्वेषां राष्ट्रव्यापिनां जीवानां सर्वकल्याणाय कामना क्रियते अत्र-

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग्भवेत्।[२०]

जनताया: सुरक्षायै राष्ट्रसुरक्षायै च जनसामान्येषु जागरुकताया: सतर्कताया: भावनापि अधिकावश्यका अस्ति। सर्वेषां राष्ट्रवादिनां कर्त्तव्यमस्ति यत् ते स्वकीये परिक्षेत्रे देशवंचकान्घातकाञ्च न अभिवधेयु:। ऋग्वेदे उपदिश्यते यत् देशद्रोहिजना: न आश्रयीतव्या:। तान् नष्येत्।[२१] सन्देहं-जनिते प्रशासनं सूचयित्वा राष्ट्ररक्षणे आरक्षकानां सहायको भवितव्य:। राष्ट्रसम्पदाहन्तकेभ्य: राष्ट्रं रक्षय।[२२]



Scanned by CamScanner

बुद्धचरिते महाकाव्ये महाकविना लिख्यते यत् कुशपुरनगरे बुद्धस्य परिनिर्वाणान्तरे बुद्धस्य अस्थिपातुकामैः अन्यैः प्रतिवासिभिः राजभिः कुशपुरमावृत्तम्। तस्मिन् अवसरे कुशपुरवासिनः एकीकृतभूत्वा तान् प्रतिकारयन्।

धृतधैर्या भयं त्यक्त्वा प्राकारे संगता द्रुतम्।
पौराः शत्रुषु तीक्ष्णानि शास्त्राण्यस्त्राणि चिक्षिपुः।।[२३]

अर्थात् पुरवासिनः धैर्यं संधार्य भयं परित्यज्य संघीभूत्वा प्राकारमारूह्य शत्रुणामुपरि तीक्ष्णास्त्र-शस्त्रान् क्षिपन्ति। अत्र राष्ट्रियभावनायाः दर्शनं भवन्ति।

पुरप्रवेशमाकर्ण्य तुच्छोऽपि विक्रमिष्यति।
वराकाः पादसंक्रान्ताः कीटाश्चापि दशन्त्यलम्।।[२४]

नगरे (राष्ट्रे) शत्रुप्रवेशसूचनामाकर्ण्य राष्ट्रिय-भावनान्वितः सामान्यजनोऽपि राष्ट्रहिताय पराक्रमं प्रदर्शयति यत् पादेनदलितः कीटोऽपि पूर्णबलेन दशति।

यत् नागरिकाः जन्मभूमिं जन्मदातुः मातुः सदृशाः एव मन्यन्ते। यथा स्वर्णमयीं लंकां विजित्य रामः लक्ष्मणं प्रति कथयति यत् 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसि।'[२५] अनेनैव प्रकारेण राष्ट्रवासिनः जन्मभूमौ परिव्याप्तानि अन्यान्यपितत्त्वानिप्रत्यपि आत्मीयभावं प्रकटयन्ति। यथा वैदिकर्षिः कथयति-

द्यौर्वः पिता पृथिवी माता सोमो भ्राताऽदितिः स्वसा।[२६]

एतत् सर्वं संस्कृतेः प्रभावः एव। कस्यापि राष्ट्रस्य कीर्तिपताका तस्य देशस्य संस्कृतिरेव भवति। भारतीया संस्कृतिः अनेकतायामेकतां धारयति। अनेकाः धर्माः मत-मतान्तराः विविधाः भाषाः उपासनापद्धतयश्च प्रचलन्ति तदपि सर्वेषु एकसूत्रता एकता च वर्तते। किन्तु यदा-कदा केचिद् असामाजिकाः तत्त्वाः जनान् भ्रमीकर्तुं सफलाः भवन्ति। तेषां कुकृत्येन कारणेन धर्मेषु मतेषु वा विवादः भवति तदा-तदा राष्ट्रस्य ह्रासः एव भवति। दादरीकाण्डः, पश्चिमबंगाले मालदा काण्डः जवाहरलालनेहरुविश्वविद्यालय-काण्डश्च अस्य उदाहरणानि सन्ति। एभ्यः विनाशेभ्यः निवारयितुं राष्ट्रजनानां कृते सतर्कता जागरुकता च आवश्यके स्तः। विनाशाय कोऽपि धर्मः न उपदिशति। सद्धर्मः अन्यं किञ्चिदपि धर्मं न बाधते। धर्मस्य यथार्थपरिभाषा महाभारते वर्णितमास्ति यत्-

धर्मं यो बाधते धर्मो न स धर्मः कुधर्मः तत्।
अविरोधत् तु यो धर्मः स धर्मः सत्यविक्रम।।[२७]

स एव धर्मः य अन्यं धर्मं न बाधते। यः धर्मः अन्यं धर्मं बाधते सः धर्मः धर्मः न अस्ति तत्तु कुधर्मः एव। सर्वेषां धर्माणामेकतैव सर्वजनकल्याण-



Scanned by CamScanner

कारिका राष्ट्रकल्याणकारिका च वर्तते। सम्प्रति अस्मिन् प्रसंगे वैदिकर्षेः कथनं प्रासंगिकं अस्ति।

जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसम्।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती।।[२८]

अर्थात् भवन्तः सर्वे जनाः स्वकीयेन सुविधानुसारेण कस्यांचिदपि ऐच्छिकायां भाषायां वार्तालापं कुर्वन्तु, यथेच्छिकं धर्मं पालय किन्तु स्वकीयं समग्रराष्ट्रं स्वगृहसमं मानय। सर्वेजनाः एकीकृतभूत्वा राष्ट्रं रक्षय, वर्धय। तदैव राष्ट्रं रक्षितं संवर्धितं भविष्यति सर्वे जनाः अपि सुखिनः भविष्यन्ति। तदैव अस्माकं राष्ट्रं तद्स्वरूपं प्राप्स्यति यद्रूपं देवाः स्मरन्ति।

गायन्ति देवाः किल गीतिकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पद मार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्।।[२९]

महाकविशूद्रकोऽपि राष्ट्रस्य सम्पूर्णसमृद्धिं कांक्ष्यति-

क्षीरिण्यः सन्तु गावो, भवतु वसुमती सर्वसम्पन्नसस्या,
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः।।[३०]

गावः दुग्धदोहाः भवन्तु, धरित्री अपि धारयतु सफलाः सस्याः, मेघाः काले समुचिता वर्षन्तु। मनोहारिणी वायुरपि वह्येत् जगज्जन्माः जीवाः सुखिनः भवन्तु। सर्वे विद्वान्सः प्रज्ञावन्तः समादरणीयाः भवन्तु, श्रीमन्तः शासकाः राष्ट्रद्रोह्यपघातकाः भवन्तु। अन्याः सर्वे शासकाः धार्मिकाः भवन्तु।

अनेन प्रकारेण स्पष्टमस्ति यत् संस्कृतवाङ्मयं राष्ट्रिय-भावनया ओतप्रोतमस्ति। संस्कृतजगतः सर्वेषां मनीषिणां सम्पूर्णचिन्तनं राष्ट्रहिताय एव अस्ति। जगद्धिताय बुद्धो हि बोधमाप्नोति शाश्वतम्। अतएव सः जीवानां सर्वेषां तु हिते रतः भवति।



Scanned by CamScanner

**सन्दर्भाः**

१. यजुर्वेदः
२. अथर्ववेदः
३. अथर्ववेदः-१.२९
४. अथर्ववेदः-१.२९.१
५. स्वप्नवासवदत्तम्, भरतवाक्यम्, ४.१९
६. विष्णुपुराणम्
७. शुक्ल यजुर्वेदः ३६/१७
८. अभिज्ञानशाकुन्तलम्
९. नीतिशतकम्-३७
१०. बुद्धचरितम् २.३९
११. अर्थशास्त्रम् प्रथमाधिकरणं, प्रकरणं-१५ अध्यायः -१८
१२. नीतिशतकम्-१६
१३. भारतगीतिका-१
१४. संस्कृत साहित्य में राष्ट्रिय भावना पृ. २३६
१५. केरलोदयः महाकाव्यम् डॉ. के. एन एलुत्तच्दन्
१६. ऋग्वेदः-१०/१९१/२-४
१७. अर्थशास्त्रम् अधि.-१, प्रक. ८, अध्य. १६,पृ. ५७
१८. पं. सुधाकरशुक्लकृतं देवदूतं पूर्वार्द्ध-२०
१९. श्रीमद्भगवद्गीता-२.७१
२०. वृहदारण्यकोपनिद्
२१ ऋग्वेदः- १.१५.९, १.६१.१०, १.८०
२२. ऋग्वेदः-१.६१.१०
२३. बुद्धचरितम् - २८.१०
२४. बुद्धचरितम् - २८.२०
२५. रामायणम्
२६. ऋग्वेदः - १.१९१.६
२७. महाभारत, वन पर्व, १३१.१०
२८. अथर्ववेदः, १२/१/४५
२९. विष्णुपुराणम्-२.३.२५
३०. मृच्छकटिके भरतवाक्यम्


*सहायकाचार्यः, संस्कृतविभागः*
*डॉ.हरीसिंहगौरविश्वविद्यालयः*
*सागरम् ( म.प्र. )*


अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577
Scanned by CamScanner

सागरिका समिति पंजीयन क्रमांक ८७६

NEWS PAPER'S REG. NO. : 13073/67

## जयतु जयतु गौरः



**सागरविश्वविद्यालयस्य संस्थापकः डॉक्टर-सर-हरीसिंहगौरः**

जन्म : २६ नवम्बर १८७०  निर्वाण : २५ दिसम्बर १९४९

स हि सर हरिसिंहो दानवीरो नृसिंहो
जयतु जयतु गौरः प्राज्ञमान्योऽद्वितीयः।
इह विलसति धन्यो विश्वविद्यालयोऽयं
गुणगणमहिमानं ख्यापयन् यस्य नित्यम्॥

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)

Computers, Sagar (M.P.) # 9827232708